दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लसप्तमी
श्रावण 04 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-7 ■ वर्ष-5 ■ अङ्क-270 | 1 | जुलाई 20, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 जम्मू-कश्मीर-प्रदेशे आकस्मिकजलप्लावनेन च, त्रिभिः महिलाभिः सह न्यूनातिन्यूनं चत्वारः जनाः मृताः

3 हिमाचले निर्मास्यन्ते चत्वारः नूतनाः ई-आगाराः (E-Depot), हरित-परिवहनाय प्राप्स्यति प्रोत्साहनम्, १०० नूतनानि विद्युत्-बसयानानि अपि सम्मीलितानि भविष्यन्ति

6 सोनम वांगचुक महोदयस्य चिकित्साकार्ये हस्तक्षेपं कर्तुं दिल्ली-उच्चन्यायालयस्य अस्वीकारः

## संसदः प्रावृट्-सत्रात् प्राक् सर्वकारेण सर्व-दलीयसभा आहूता; सभायां एन्. सी. पी. आई.-दलं आमन्त्रणे विपक्षेण प्रतीकात्मकरूपेण बहिष्कारं कृतम्



**हिमसंस्कृतवार्ता।** आरभ्यमाणस्य संसदः प्रावृट सत्रम् आगामीमासस्य त्रयोदश दिनाङ्क यावत् प्रचलिष्यति। अस्मिन् सत्रे अनेकानि महत्त्वपूर्णानि विधेयकानि प्रस्तूयन्ते। प्रावृट् सत्रस्य पूर्वसन्ध्यायां केन्द्रसर्वकारेण गतदिने संसदि सर्वदलीय-सभा आयोजिता । अस्याः सभायाः अध्यक्षता रक्षामन्त्री राजनाथसिंहः, केन्द्रीय-संसदीयकार्यमन्त्री किरेन रिजिजू, राज्यसभायाः सदननेता जगतप्रकाश नड्डा च अकुर्वन्। संसदीयकार्यराज्यमन्त्री अर्जुनराम मेघवालः तथा डॉ. एल. मुरुगन् अपि सभायाम् उपस्थितौ आस्ताम्। सभायां अपना दलस्य नेतृ अनुप्रिया पटेलः, जेडीयू-दलस्य नेता संजय झा, टीडीपी-दलस्य नेता लावु श्रीकृष्ण देवरायलू, काङ्ग्रेस-दलस्य नेता जयराम रमेशः, समाजवादी दलस्य नेता धर्मेन्द्र यादवः, झारखण्ड-मुक्ति-मोर्चा-दलस्य राज्यसभासदस्या महुआ माझी, तथा चत्वारिंशदधिकानां राजनैतिकदलानां पञ्चाशदधिकाः नेतारः उपस्थिताः आसन्। सभायाः आरम्भे एव विपक्षीयदलानां सदस्याः (एनसीपीआई) इत्यस्य दलस्य सहभागितामालक्ष्य विरोधं प्रदर्शयितुं प्रतीकात्मकरीत्या उपवेशनात् बहिर्गतवन्तः। एनसीपीआई इति पञ्जीकृतम् राजनैतिकदलम् अस्ति, यस्य पश्चिमबङ्ग-विधानसभानिर्वाचनेषु सहभागिता अभवत्। सम्प्रति तृणमूल काङ्ग्रेस-दलस्य अनेकाः विद्रोही-सांसदाः अपि अस्मिन् दले सम्मिलिताः सन्ति। तथापि विरोधं प्रकटयन् विपक्षीयाः पुनः सभायां समुपविष्टाः। सभायाः अनन्तरं वार्ताहरैः सह संवादं कुर्वन् किरेन रिजिजू सर्वेभ्यः राजनैतिकदलेभ्यः संसदः सुचारुरूपेण सञ्चालनं सुनिश्चितं कर्तुं तथा प्रमुखविषयेषु रचनात्मकचर्चायां सहभागितायै प्रार्थितवान्। सः उक्तवान् यत् लोकतन्त्रं सुदृढीकरणाय व्यवधानस्य अपेक्षया सार्थका चर्चा अधिका आवश्यकाऽस्ति। वार्ताहरैः सह संवादं कुर्वती तृणमूल काङ्ग्रेस-दलस्य सांसद् महुआ मोजा अवदत् यत् काङ्ग्रेस-दलम्, समाजवादी-दलम्, डी.एम्.के., जे.एम्. एम्., तृणमूल काङ्ग्रेस-दलम्, आम आदमी-दलम् च समेत्य सर्वे विपक्षीय-दलानि सर्वदलीय-सभातः बहिर्गताः। सा एतदपि आरोपितवती यत् एन्.सी.पी.आई. संसदि मान्यताप्राप्तम् संसदीय दलम् नास्ति। राज्यसभायाः विपक्षस्य उपनेता प्रमोद तिवारी सभातः बहिर्गमनं एन्.सी.पी.आई. दलस्य आमन्त्रणस्य विरोधे प्रतीकात्मक-बहिष्कारः एन्.सी.पी.आई. दलस्य नेता सुदीप बन्द्योपाध्यायः सर्वदलीय-सभायां विपक्षीय-दलानां विरोधस्य कठोरां निन्दाम् अकरोत्। सः अवदत् यत् राष्ट्रिय-जनतान्त्रिक गठबन्धने (एन.डी.ए.) एन्.सी.पी.आई. दानीं द्वितीयं बृहत्तमम् दलम् अस्ति।

## सुभाषितम्

**अक्रोधेन जयेत् क्रोधम्**
**असाधुं साधुना जयेत्।**
**जयेत् कदर्यं दानेन**
**जयेत् सत्येन चानृतम्।।**

क्रोध का त्याग करके ही क्रोध को जीता जा सकता है, साधु बनकर ही असाधु से जीता जा सकता है, दान से ही कंजूसी प्रवृत्ति को हरा सकते है, सत्य से ही असत्य को जीता जा सकता है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

## ओलम्पिक पदक विजेत्री पी. वी. सिन्धुः जापानदेशे स्वप्रथमं विजय-उपाधिम् अलभत्



द्विवारम् ओलम्पिक पदक विजेत्री पी. वी. सिन्धुः जापानदेशे स्वप्रथमं विजय-उपाधिम् अलभत्। सा गतदिने जापान-ओपन-स्पर्धायाम् विजयं प्राप्य एतत् प्रतिष्ठितं उपाधिं जेतुं प्रथमभारतीय-शटल क्रीडिका जाता। तया स्व प्रतिद्वन्द्विनी तथा त्रिवारं विश्व विजेत्री-उपाधिधारिणी अकाने यामागुची नाम्नी क्रीडिकां २१-१७, २१-१७ ति अंकान्तरालैः पराजिता। क्रीडामन्त्री डॉ. मनसुख माण्डविया एतस्याः ऐतिहासिकविजयाय पी. वी. सिन्धुं हार्दिकं अभिनन्दनम् अकरोत्। सामाजिक-माध्यमे प्रकाशिते स्वसन्देशे सः अवदत् यत् "सम्पूर्णः भारतदेशः त्वयि गर्वम् अनुभवति।

## फिफा विश्वचषकः २०२६: अर्जेंटिनादेशं पराजित्य स्पेनदेशः पुनः विश्वविजेता अभवत्




२०२६ तमस्य वर्षस्य फिफा-विश्वचषक-प्रतिस्पर्धायाः अन्तिमे रोमाञ्चक-द्वन्द्वयुद्धे स्पेनदेशेन अर्जेंटिनादेशः १-० इति गोल-अङ्केन पराजितः। अनेन सह स्पेनदेशः द्वितीयवारं विश्वविजेता (World Champion) अभवत्।

**क्रीडायाः विवरणम्:** अनिर्णितः समयः (९० निमेषाः): क्रीडायाः निर्धारितेषु ९० निमेषेषु उभयतः कोऽपि गोल-अङ्कं कर्तुं न समर्थः अभवत्। अर्जेंटिनापक्षस्य रक्षणपङ्क्तिः (Defense) अतिदृढा आसीत्, परन्तु एन्जो फर्नांडिस (Enzo Fernández) इत्यस्मै रक्तपत्रं (Red Card) लब्धम्, येन अर्जेंटिना-दले केवलं दश क्रीडकाः एव अवशिष्टाः।

**अतिरिक्तसमयः (Extra Time) गोलश्च:** अतिरिक्तसमये १०६ तमे निमेषे स्पेनदेशस्य क्रीडकेन फेरान टोरेस (Ferran Torres) इत्यनेन निको विलिम्यस (Nico Williams) इत्यस्य साहाय्येन एकः सुन्दरः गोल-अङ्कः कृतः। एषः एव गोलः निर्णायकः अभवत्।

**अन्तिमप्रयासः:** लियोनेल मेसी (Lionel Messi) इत्यस्य नेतृत्वे अर्जेंटिना-दलेन अन्तिमक्षणं यावत् समत्वं आनेतुं (Equalizer) बहवः प्रयासाः कृताः, परन्तु स्पेनदेशस्य रक्षणपङ्क्त्या तेषां सर्वे प्रयासाः विफलीकृताः। अन्ते, पूर्णसमये जाते स्पेनदेशस्य क्रीडकाः प्रसन्नाः अभवन्, स्पेनदेशस्य हस्ते च पुनः एकदा विश्वचषकः आगतः।

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## अन्ताराष्ट्रिय-जीवविज्ञान-ओलम्पियाड-प्रतियोगितायां भारतस्य अभूतपूर्वा सफलता

लिथुआनिया-देशस्य विल्नियस-नगरे आयोजिते सप्तत्रिंशत्तमे (37) अन्ताराष्ट्रिय-जीवविज्ञानओलम्पियाड-2026 (IBO) इति प्रतियोगितायां भारतेन एकं स्वर्णपदकं त्रीणि च रजतपदकानि विजितानि।हरियाणा-राज्यस्य भव्या गुणवाल स्वर्णपदकं प्राप्तवती, यदा च पश्चिमबंगालस्य सौमिल मैती, राजस्थानस्य निशित कलानी, पञ्जाबस्य च अनमोल कुमारः रजतपदकानि प्राप्तवन्तः। एषा ओलम्पियाड-प्रतियोगिता जुलाई-मासस्य द्वादशे (12) दिनाङ्के आरब्धा आसीत्, अद्य च अस्याः समापनम् अभवत्। परमाणु-ऊर्जा-विभागेन प्रमाणीकृतं यत् अस्मिन् वर्षे अस्यां प्रतियोगितायां 78 देशेभ्यः 307 छात्राः सम्मिलिताः अभवन्। विभागेन उक्तं यत् अस्मिन् ओलम्पियाड-महोत्सवे आहत्य 31 स्वर्णपदकानि, 61 रजतपदकानि, 91 कांस्यपदकानि च वितरितानि।

# शीघ्रमेव प्रवर्तिष्यते नूतना औद्योगिकनीतिः, उद्योगेभ्यः उपलब्धं कारयिष्यते वहनीयं विद्युत्-धनम् – मुख्यमन्त्री सुक्खुः



हिमसंस्कृतवार्ताः — शिमला। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खु महोदयेन निवेशकान् हिमाचलप्रदेशे निवेशाय आमन्त्रयता प्रतिपादितं यत् प्रदेशः निवेशदृष्ट्या देशस्य श्रेष्ठतम-गन्तव्येषु (destinations) अन्यतमः वर्तते। मुख्यमन्त्री शनिवासरे सायं 'द इण्डस इण्टरप्रेन्योर्स' (TiE) चण्डीगढ इत्यनेन आयोजिते 'चण्डीगढ लीडरशिप कॉन्क्लेव' तथा च २३ तमे वार्षिक-सामान्य-उपवेशने सम्बोधनम् अकरोत्। अस्मिन् अवसरे तेन प्रोक्तं यत् राज्यसर्वकारः निवेशकेभ्यः सर्वविधाः सुविधाः सहयोगं च प्रदातुं कटिबद्धः अस्ति। मुख्यमन्त्रिणा कथितं यत् अहोरात्रं (२४ घण्टां) निर्बाध-विद्युत्-आपूर्तिं सुनिश्चितां कर्तुं निवेशं च आकर्षयितुं राज्यसर्वकारः नूतनाम् औद्योगिकनीतिम् आनयति, यस्याः अन्तर्गतं विद्युत्-दराणि न्यूनानि (वहनीयानि) रक्षिष्यन्ते। तेन प्रोक्तं यत् प्रदेशः 'ग्रीन हाइड्रोजन' (Green Hydrogen) उत्पादनस्य क्षेत्रे देशस्य अग्रणी राज्यं भवितुं तीव्रगत्या अग्रे सरति। तेन कथितं यत् स्वच्छ-ऊर्जायाः दिशि स्वीकृत-उपायानाम् अन्तर्गतं प्रदेशे 'बायोचार' (Biochar) यन्त्राणि संस्थाप्यन्ते। एतदतिरिच्य किन्नौरमण्डले भू-तापीय-ऊर्जा-परियोजना (Geothermal Energy Project) पूर्वमेव संस्थापिता अस्ति।

हिमाचलप्रदेशं 'ऊर्जा-अतिरेक' (पावर सरप्लस) राज्यरूपेण रेखाङ्कितं कुर्वन् मुख्यमन्त्रिणा प्रतिपादितं यत् पञ्जाबराज्याय विद्युत्-आपूर्तेः सुनिश्चिताय त्रयाणां वर्षाणां कृते विद्युत्-क्रयण-सहमतिः क्रियते। पञ्जाबराज्यं हिमाचलस्य 'ज्येष्ठभ्राता' इति कथयता मुख्यमन्त्रिणा प्रोक्तं यत् एषा सहमतिः पञ्जाबप्रदेशेन सह अस्माकं सम्बन्धं इतोऽपि सुदृढं विधास्यति।

## सोलनमण्डलस्य कण्डाघाटक्षेत्रे विकसिष्यते आई.टी. पार्क इति

मुख्यमन्त्रिणा कथितं यत् हिमाचलप्रदेशः सूचना-प्रौद्योगिकी (IT) क्षेत्रस्य विस्ताराय अनुकूलं वातावरणं यच्छति। राज्यसर्वकारः 'डेटा स्टोरेज' (Data Storage) अधोसंरचना-विकासाय अपि कार्यं करोति। एतद्विना सोलनमण्डलस्य कण्डाघाटक्षेत्रे 'आई.टी. पार्क' (IT Park) विकसिष्यते। तेन प्रोक्तं यत् वस्तु-सेवा-कर (GST) प्रवर्तनात् पूर्वं प्रदेशस्य औद्योगिकक्षेत्रेभ्यः राज्यं प्रति प्रायः ४,००० कोटिरूप्यकाणां राजस्वं प्राप्यते स्म, परन्तु जीएसटी-प्रवर्तनात् परं एतत् न्यूनीभूय प्रायः १५० तः २०० कोटिरूप्यकाणि एव अवशिष्टम्। प्रदेशस्य भौगोलिक-परिस्थितीः ध्यात्वा राज्यसर्वकारः स्वकीयासु औद्योगिकनीतिषु आवश्यकं संशोधनं विदधाति।

## मानसून-ऋतौ अपि पर्यटकेभ्यः सुरक्षितः अस्ति हिमाचलप्रदेशः


मुख्यमन्त्रिणा प्रतिपादितं यत् प्राकृतिक-आपदानां प्रतिकूलः प्रभावः केवलं हिमाचलप्रदेशं यावत् सीमितः नास्ति, अपितु अन्येषु राज्येषु अपि आपदः आगच्छन्ति। भूमण्डलीय-तापनस्य (Global Warming) कारणात् मेघविस्फोटस्य घटनाः प्रवृद्धाः। तेन प्रोक्तं यत् मानसून-काले (वर्षाऋतौ) अपि हिमाचलप्रदेशः पर्यटकेभ्यः पूर्णतया सुरक्षितः अस्ति, परन्तु ऋतोः स्थितिं वीक्ष्य नदीभ्यः उपनदीभ्यश्च दूरे स्थानम् आवश्यकं वर्तते। तेन कथितं यत् वर्षाकाले अपि प्रदेशे प्रायः ७५ लक्षं जनाः निवसन्ति। अतः पर्यटकाः कसशमपि भयं विना हिमाचलप्रदेशस्य यात्रां कुर्युः।

## आगामि-त्रिवर्षेषु पूर्णा भविष्यति चण्डीगढ-बद्दी रेल-परियोजना

मुख्यमन्त्रिणा कथितं यत् हिमाचलप्रदेशः चण्डीगढनगरे स्वकीयस्य ७.१९ प्रतिशतं भागं प्राप्तुं निरन्तरं प्रयतते अस्मिन् विषये च सतत सम्भाषणं प्रचलति। तेन प्रोक्तं यत् चण्डीगढतः बद्दी पर्यन्तं रेलमार्गस्य निर्माणं क्रियते, यस्मिन् भूम्यधिग्रहणस्य निर्माणव्ययस्य च ५० प्रतिशतं भागं राज्यसर्वकारः वहति। अस्याः परियोजनायाः आगामि-त्रिवर्षेषु पूर्णा भवितुं सम्भावना अस्ति, येन बद्दी-नालागढ क्षेत्रयोः उद्योगाः विशेषरूपेण लाभान्विताः भविष्यन्ति। तेन प्रोक्तं यत् पर्यटनस्य निवेशस्य च प्रोत्साहनाय काङ्गड़ा-विमानपत्तनस्य (हवाई अड्डे का) विस्तारः क्रियते, येन पर्यटकानाम् औद्योगिकक्षेत्रस्य च द्वयोः लाभः भविष्यति। एतदतिरिच्य राज्यसर्वकारः प्रदेशे हेलीपोर्ट-निर्माणं करोति तथा च भविष्ये सर्व मण्डलमुख्यालयेभ्यः हेलीकॉप्टर-सेवाः आरप्स्यन्ते। मुख्यमन्त्रिणा प्रतिपादितं यत् काङ्ग्रेस-सर्वकारः हिमाचलप्रदेशम् आत्मनिर्भरं विधातुं प्रमुखतया कार्यं करोति। ग्रामीण-अर्थव्यवस्थायाः सुदृढीकरणाय अनेके उपायाः क्रियन्ते। उद्योगिनः निवेश-हितैषि-प्रयासानां लाभं ग्रहीतुं शक्नुवन्ति, येन प्रदेशस्य जनानाम् आर्थिक-विकासाय अपि गतिः प्राप्स्यति। तेन कथितं यत् राज्यसर्वकारः स्वास्थ्यं, शिक्षां, ग्रामीण-अर्थव्यवस्थां, पर्यटनं तथा च आई.टी. क्षेत्रं सर्वोच्चप्राथमिकतां ददाति। आयुर्विज्ञानमहाविद्यालयेषु स्वास्थ्यसेवाः सुदृढाः क्रियन्ते तथा च स्वास्थ्यक्षेत्रे व्यापकाः परिष्काराः विधीयन्ते। तेन प्रोक्तं यत् राज्यसर्वकारः शीघ्रमेव 'स्वास्थ्य-पर्यटनं' (Medical Tourism) अपि प्रोत्साहयितुं प्रभाविनः उपायान् करिष्यति।

# जम्मू-कश्मीर्-प्रदेशे आकस्मिकजलप्लावनेन च, त्रिभिः महिलाभिः सह न्यूनातिन्यूनं चत्वारः जनाः मृताः





जम्मू-कश्मीर्-प्रदेशे, गतदिने बहुषु स्थानेषु प्रचण्डवृष्ट्या भूस्खलनेन, आकस्मिकजलप्लावनेन च, त्रिभिः महिलाभिः सह न्यूनातिन्यूनं चत्वारः जनाः मृताः, अन्ये च नैके लुप्ताः सन्ति। सर्वाधिकं बाधितं क्षेत्रं पूञ्छ-मण्डलस्य सुरानकोट-उपमण्डलम् अस्ति। प्रभाविताः निवासिनः निष्कासयितुं, प्रभावितपरिवारेभ्यः उपशमनं प्रदातुं च क्षेत्रे रक्षादलानि संलग्नानि सन्ति। नूनाबन्दी-ग्रामे गृहपतनेन एका महिला मृता, तस्याः व्रणिताः पतिः त्रयः बालकाः च रक्षिताः। लोवर-मुर्राह-ग्रामे भूस्खलनेन षट् जनानां परिवारः लुप्तः अभवत्, अन्वेषणस्य उद्धारस्य च कार्याणि प्रचलन्ति। रात्रौ अविछिन्नवृष्ट्यानन्तरं राजौरी-नगरम् अपि आकस्मिकजलप्लावनेन आक्रान्तम् अभवत्, येन शतशः निवासिनः सुरक्षितस्थानेषु गन्तुं बाध्याः अभवन्, जलप्लावनेन अनेकाः निम्नप्रदेशाः जलप्लाविताः अभवन्। उपराज्यपालः मनोजसिन्हा राजौरी-पूञ्छ-नगरयोः साहाय्योद्धार-कार्यस्य समीक्षाम् अकरोत्। मुख्यमन्त्री उमर अब्दुल्ला अपि प्राणहानिं प्रति शोकं प्रकटितवान् तथा च आश्वासितवान् यत् सर्वाः संस्थाः उद्धारकार्ये साहाय्यकार्ये च निमग्नानि सन्ति। केन्द्रीय-गृह-मन्त्री अमितशाहः जम्मू-कश्मीरस्य उपराज्यपालेन मनोजसिन्हा वर्येण मुख्यमन्त्रिणा उमर अब्दुल्ला इत्यनेन च सह वार्तालापं कृत्वा जलप्रलयस्य स्थितिं समीक्षितवान्। प्रभावितानां सुरक्षायै, संरक्षायै च केन्द्रसर्वकारेण सर्वविध-साहाय्यं प्रदीयन्ते मिश्रीशाहेन तेभ्यः आश्वस्तिम्। अत्रान्तरे, कटरा-त्रिकुटा-पर्वतेषु प्रतिकूल-ऋतोः कारणात् श्रीमाता वैष्णोदेवी-यात्रा स्थगिता अस्ति। भक्तानां सुरक्षा-सुनिश्चिततायै तीर्थयात्रा अस्थायीरूपेण स्थगिता अस्ति। श्री-अमरनाथ-जी-यात्रा अपि गतदिनोरभ्य पहलगाम-बालटाल-मार्गयोः स्थगिता भविष्यति। लद्दाख प्रदेशे कारगिल-मण्डलस्य सङ्गराह-ग्रामे आकस्मिकजलप्लावनेन कारगिल-ज़न्स्कर-राष्ट्रिय राजमार्गः, बारसू-लिङ्ङ्क-मार्गः च बाधितः।

# राष्ट्रपतिः द्रौपदी मुर्मुः, मोल्दोवा, उत्तर-मैसेडोनिया, रोमानिया-देशानाम् त्रि-राष्ट्रयात्रां प्रारब्धवती



गतदिने राष्ट्रपतिः द्रौपदी मुर्मुः, मोल्दोवा, उत्तर-मैसेडोनिया, रोमानिया-देशानाम् त्रि-राष्ट्रयात्रां प्रारब्धवती। तस्याः यात्रायाः प्रथमे चरणे राष्ट्रपतिः मुर्मुः मोल्दोवा-देशं प्राप्तवती। कस्यापि भारतीयराष्ट्रपतेः मोल्दोवा-देशस्य एतत् प्रथमं भ्रमणम् भविष्यति। तस्याः यात्रायाः समये राष्ट्रपतिः स्वप्रतिपक्षेन मैया साण्डु इत्यनया सह प्रतिनिधिस्तरीयोपवेशनं कृतवती। सा संसदः अध्यक्षेण इजोर् ग्रोसु त्यिनेन सहापि मिलितवती। सा मोल्दोवा-भारत-संसदीय मैत्री-समूहस्य सदस्यैः सहापि संवादं कृतवती, वाणिज्य-मञ्चं सम्बोधितवती, भारतीयसमुदायस्य सदस्यैः सह संवादं च विधास्यति। यात्रायाः द्वितीये चरणे राष्ट्रपतिः मुर्मुः जुलाई मासस्य एकविंशतिः द्वाविंशतिः दिनाङ्कयोः उत्तर-मैसेडोनिया-देशे भविष्यति। त्रि-राष्ट्रयात्रायाः अन्तिमे चरणे, श्रीमतीमुर्मुः जुलाई मासस्य त्रयोविंशतितः पञ्चविंशतिः दिनाङ्क पर्यन्तं रोमानिया देशं गमिष्यति।

# हिमाचले निर्मास्यन्ते चत्वारः नूतनाः ई-आगाराः (E-Depot), हरित-परिवहनाय प्राप्स्यति प्रोत्साहनम्, १०० नूतनानि विद्युत्-बसयानानि अपि सम्मीलितानि भविष्यन्ति





**हिमसंस्कृतवार्ताः — शिमला ।**
हिमाचलप्रदेशे हरित-आधुनिक-सार्वजनिक-परिवहनव्यवस्थायाः सुदृढीकरणाय एकं महत् पदं स्वीकुर्वन् हिमाचल-पथ-परिवहन-निगमस्य (HRTC) चत्वारः नूतनाः ई-आगाराः संस्थापयिष्यन्ते। एतेषां डिपो-केन्द्राणाम् आरम्भेण प्रदेशे इलेक्ट्रिक-बसयानानां संजालः (नेटवर्क) तीव्रगत्या विस्तारं प्राप्स्यति, दुर्गमक्षेत्रान् यावत् पर्यावरणानुकूल-परिवहनसुविधानां प्रापणमार्गः अपि सुगमः भविष्यति। एतेभ्यः डिपो-क्षेत्रेभ्यः १०० नूतनानाम् विद्युत्-बसायानानां सञ्चालनम् अपि विधास्यते। प्रत्येकस्मात् डिपो-केन्द्रात् २५-२५ इलेक्ट्रिक-बसयानानि चालयिष्यन्ते। प्राप्तानुसारं नादौन, ठियोग, हरोली तथा च नाहन क्षेत्रेषु ई-आगाराः संस्थापनीयाः सन्ति। एतेषु नाहन-ठियोग डिपो-द्वयाय केन्द्रसर्वकारतः स्वीकृतिः प्राप्ता अस्ति, यदा च नादौन-हरोली क्षेत्राभ्यां प्रस्तावः केन्द्रसर्वकाराय प्रेषितः अस्ति। निगमस्य आकाङ्क्षा वर्तते यत् अनयोः द्वयोः डिपो-केन्द्रयोः स्वीकृतिः अपि शीघ्रमेव उपलप्स्यते, यस्मात् परं निर्माणस्य अन्यासां औपचारिकतानां च कार्यं तीव्रगत्या पूरयिष्यते। अधिकारिणाम् अनुमानम् अस्ति यत् आगामि-मासद्वयात् मासत्रयस्य मध्ये एतेषां चतुर्णां डिपो-केन्द्राणां कार्यं पूर्णं विधास्यते। एतेषाम् ई-डिपो माध्यमेन प्रदेशे इलेक्ट्रिक-बसयानानां सञ्चालनं नूतनव्यवस्थायाः अन्तर्गतं भविष्यति।
बसयानानाम् आपूर्तिः भारतसर्वकारस्य पक्षतः विधास्यते, यदा च तासां सञ्चालनम् एचआरटीसी (HRTC) करिष्यति। सञ्चालनव्यवस्थायां बसयानानां चालकाः (ड्राइवर) तान्त्रिकप्रबन्धनं च भारतसर्वकारस्य अधीने स्थास्यति, यदा च एचआरटीसी संस्था परिचालकान् (कंडक्टर) उपलब्धं कारयिष्यति। बसयानानां सञ्चालनात् प्राप्यमाणा आयः परिवहननिगमाय प्राप्स्यते, येन निगमस्य आर्थिकस्थितिः अपि सुदृढा भवितुम् आशा वर्तते। राज्ये ई-डिपो निर्माणेन प्रदेशस्य दुर्गमेषु पार्वत्येषु च क्षेत्रेषु अपि इलेक्ट्रिक-बससेवा विस्तारं लप्स्यते। अनेन यात्रिभ्यः श्रेष्ठा, सुखमयी, प्रदूषणमुक्ता च परिवहनसुविधा उपलप्स्यते। साकमेव डीज़ल-आधारित-बसयानेषु निर्भरता न्यूनीभविष्यति कार्बन-उत्सर्जने अपि उल्लेखनीयः ह्रासः (कमी) आगमिष्यति। प्रदेशे इलेक्ट्रिक-सार्वजनिक-परिवहनस्य प्रोत्साहनाय पूर्वमेव बृहत्स्तरे कार्यं चलति। एचआरटीसी-संस्थायाः वाहनावल्यां कुलानि २९७ नूतनानि वैद्युतिक-बसयानानि सम्मीलितानि क्रियन्ते। एतेषु प्रायः १५८ बसयानानि विविध-डिपो-केन्द्रेभ्यः प्रदत्ताः सन्ति, यदा च प्रायः १०० विद्युत्बसयानानि शिमला तथा च कुल्लू-मनाली क्षेत्रेषु पूर्वमेव सञ्चालितानि सन्ति। अधुना चतुर्णां नूतनानाम् ई-डिपो संस्थापनात् परं १०० अतिरिक्तानि वैद्युतिक-बसयानानि अपि प्रदेशस्य मार्गेषु अवतरिष्यन्ति, येन राज्यस्य विविधेषु क्षेत्रेषु सार्वजनिक-परिवहनसेवाः इतोऽपि सुदृढाः भविष्यन्ति।

## हरित-हिमाचलस्य दिशि महत् पदम्

चतुर्णां नूतनानाम् ई-डिपो संस्थापनात् परं हिमाचलप्रदेशः देशस्य तेषु राज्येषु समाविष्टः भविष्यति यत्र इलेक्ट्रिक-सार्वजनिक-परिवहनस्य संजालः तीव्रगत्या विस्तारं प्राप्नोति। सर्वकारस्य लक्ष्यं वर्तते यत् आगामि-वर्षेषु चरणबद्धरूपेण डीजल-बसयानानां स्थाने अधिकातिशयानाम् इलेक्ट्रिक-बसयानानां सञ्चालनं कृत्वा प्रदेशाय स्वच्छा, आधुनिका, पर्यावरणानुकूला च परिवहनव्यवस्था उपलब्धा कारणीया। नूतन-डिपो-निर्माणेन स्थानीयस्तरे विद्युत्-पूरणस्य (चार्जिंग्), स्थापनस्य, सञ्चालनस्य च श्रेष्ठाः सुविधाः अपि विकसिताः भविष्यन्ति, येन वैद्युतिक-बसयानानां सञ्चालनम् अधिकं प्रभावी सुचारु च भवितुं शक्ष्यति।

# डा. हुसैन अली इम्विनी इत्येषः गतदिने नवदिल्ल्याम् उपराष्ट्रपतिना सी. पी. राधाकृष्णन्-वर्येण सह मिलितवान्



जांज़ीबारः इत्यस्य अध्यक्षः तथा क्रान्तिकारीपरिषदः अध्यक्षः डा. हुसैन अली इम्विनी इत्येषः गतदिने नवदिल्ल्याम् उपराष्ट्रपतिना सी. पी. राधाकृष्णन्-वर्येण सह मिलितवान्। ज़ांज़ीबार इति तान्जानिया-देशस्य अर्धस्वायत्तप्रदेशः अस्ति। अस्य स्वकीयं संविधानं, राष्ट्रपतिः, प्रतिनिधि-सभा, ध्वजः च अस्ति। अस्मिन् मेलने तौ भारत-तान्जानिया-सम्बन्धस्य पूर्णव्याप्तिम् समीक्षितवन्तौ तथा च भविष्ये सहयोगस्य नूतनानां मार्गाणाम् अन्वेषणं कृतवन्तौ। उपराष्ट्रपतिः, सामाजिकान्तर्जालीये पटले अकथयत् यत् अस्मिन् मेलने भारत-तान्जानिया-देशयोः दीर्घकालिक सहभागित्वस्य तथा च ज़ांज़ीबार देशेन सह भारतस्य विशेषसम्बन्धस्य पुनरुद्धाटनं जातम्, यस्य मूलाधारः शताब्दशः पुरातनः समुद्रीयः, सांस्कृतिकः, च सम्बन्धः अस्ति। व्यापारस्य, निवेशस्य, विकाससहभागित्वस्य, पर्यटनस्य, नीलार्थव्यवस्थायाः, शिक्षायाः, तन्त्रज्ञानस्य, बहुपक्षीय-सहभागित्वस्य च क्षेत्रेषु सहकारं सुदृढं कर्तुं उपायेषु चर्चा जाता। राष्ट्रपतिः इम्विनी, चेन्नई-नगरस्य आई. आई. टी-मद्रास्-परिसरस्य भ्रमणे आनन्दं प्रकटितवान् तथा च द्वैपाक्षिक-शैक्षणिकसहयोगस्य ऐतिहासिक उपक्रमस्य आई. आई. टी-मद्रास्-ज़ांज़ीबार्-परिसरस्य स्थापनायां, अपि च जल-परियोजनानां कृते भारतस्य साहाय्यस्य, भारतीय सांस्कृतिक सम्बन्ध छात्रवृत्तेः, भारतीय-तान्त्रिक-आर्थिक-सहयोग-प्रशिक्षण कार्यक्रमस्य च कृते भारतस्य समर्थनस्य प्रशंसाम् अकरोत्। विदेशमन्त्री डा. एस. जयशङ्करः अपि गतदिने प्रातः राष्ट्रपतिना म्विनी इत्यनेन सह मिलितवान्। जांज़ीबार देशस्य राष्ट्रपतिः सम्प्रति उपराष्ट्रपतेः सी. पी. राधाकृष्णन् वर्यस्य आमन्त्रणे भारतस्य चतुर्दिवसीयायाम् आधिकारिकयात्रायाम् अस्ति।

# शीघ्रमेव प्रवर्तिष्यते नूतना औद्योगिकनीतिः, उद्योगेभ्यः उपलब्धं कारयिष्यते वहनीयं विद्युत्-धनम् – मुख्यमन्त्री सुक्खूः

हिमसंस्कृतवार्ताः — शिमला। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू महोदयेन निवेशकान् हिमाचलप्रदेशे निवेशाय आमन्त्रयता प्रतिपादितं यत् प्रदेशः निवेशदृष्ट्या देशस्य श्रेष्ठतम-गन्तव्येषु (destinations) अन्यतमः वर्तते। मुख्यमन्त्री शनिवासरे सायं 'द इण्डस इण्टरप्रेन्योर्स' (TiE) चण्डीगढ इत्यनेन आयोजिते 'चण्डीगढ लीडरशिप कॉन्क्लेव' तथा च २३ तमे वार्षिक-सामान्य-उपवेशने सम्बोधनम् अकरोत्। अस्मिन् अवसरे तेन प्रोक्तं यत् राज्यसर्वकारः निवेशकेभ्यः सर्वविधाः सुविधाः सहयोगं च प्रदातुं कटिबद्धः अस्ति।
मुख्यमन्त्रिणा कथितं यत् अहोरात्रं (२४ घण्टां) निर्बाध-विद्युत्-आपूर्तिं सुनिश्चितां कर्तुं निवेशं च आकर्षयितुं राज्यसर्वकारः नूतनाम् औद्योगिकनीतिम् आनयति, यस्याः अन्तर्गतं विद्युत्-दराणि न्यूनानि (वहनीयानि) रक्षिष्यन्ते। तेन प्रोक्तं यत् प्रदेशः 'ग्रीन हाइड्रोजन' (Green Hydrogen) उत्पादनस्य क्षेत्रे देशस्य अग्रणी राज्यं भवितुं तीव्रगत्या अग्रे सरति। तेन कथितं यत् स्वच्छ-ऊर्जायाः दिशि स्वीकृत-उपायानाम् अन्तर्गतं प्रदेशे 'बायोचार' (Biochar) यन्त्राणि संस्थाप्यन्ते। एतदतिरिच्य किन्नौरमण्डले भू-तापीय-ऊर्जा-परियोजना (Geothermal Energy Project) पूर्वमेव संस्थापिता अस्ति। हिमाचलप्रदेशं 'ऊर्जा-अतिरेक' (पावर सरप्लस) राज्यरूपेण रेखाङ्कितं कुर्वन् मुख्यमन्त्रिणा प्रतिपादितं यत् पञ्जाबराज्याय विद्युत्-आपूर्तेः सुनिश्चिताय त्रयाणां वर्षाणां कृते विद्युत्-क्रयण-सहमतिः क्रियते। पञ्जाबराज्यं हिमाचलस्य 'ज्येष्ठभ्राता' इति कथयता मुख्यमन्त्रिणा प्रोक्तं यत् एषा सहमतिः पञ्जाबप्रदेशेन सह अस्माकं सम्बन्धं इतोऽपि सुदृढं विधास्यति।

## सोलनमण्डलस्य कण्डाघाटक्षेत्रे विकसिष्यते आई.टी. पार्क इति

मुख्यमन्त्रिणा कथितं यत् हिमाचलप्रदेशः सूचना-प्रौद्योगिकी (IT) क्षेत्रस्य विस्ताराय अनुकूलं वातावरणं यच्छति। राज्यसर्वकारः 'डेटा स्टोरेज' (Data Storage) अधोसंरचना-विकासाय अपि कार्यं करोति। एतद्विना सोलनमण्डलस्य कण्डाघाटक्षेत्रे 'आई.टी. पार्क' (IT Park) विकसिष्यते। तेन प्रोक्तं यत् वस्तु-सेवा-कर (GST) प्रवर्तनात् पूर्वं प्रदेशस्य औद्योगिकक्षेत्रेभ्यः राज्यं प्रति प्रायः ४,००० कोटिरूप्यकाणां राजस्वं प्राप्यते स्म, परन्तु जीएसटी-प्रवर्तनात् परं एतत् न्यूनीभूय प्रायः १५० तः २०० कोटिरूप्यकाणि एव अवशिष्टम्। प्रदेशस्य भौगोलिक-परिस्थितीः ध्यात्वा राज्यसर्वकारः स्वकीयासु औद्योगिकनीतिषु आवश्यकं संशोधनं विदधाति।

### मानसून-ऋतौ अपि पर्यटकेभ्यः सुरक्षितः अस्ति हिमाचलप्रदेशः

मुख्यमन्त्रिणा प्रतिपादितं यत् प्राकृतिक-आपदानां प्रतिकूलः प्रभावः केवलं हिमाचलप्रदेशं यावत् सीमितः नास्ति, अपितु अन्येषु राज्येषु अपि आपदः आगच्छन्ति। भूमण्डलीय-तापनस्य (Global Warming) कारणात् मेघविस्फोटस्य घटनाः प्रवृद्धाः। तेन प्रोक्तं यत् मानसून-काले (वर्षाऋतौ) अपि हिमाचलप्रदेशः पर्यटकेभ्यः पूर्णतया सुरक्षितः अस्ति, परन्तु ऋतोः स्थितिं वीक्ष्य नदीभ्यः उपनदीभ्यश्च दूरे स्थानम् आवश्यकं वर्तते। तेन कथितं यत् वर्षाकाले अपि प्रदेशे प्रायः ७५ लक्षं जनाः निवसन्ति। अतः पर्यटकाः कसशमपि भयं विना हिमाचलप्रदेशस्य यात्रां कुर्युः।

### आगामि-त्रिवर्षेषु पूर्णा भविष्यति चण्डीगढ-बद्दी रेल-परियोजना

मुख्यमन्त्रिणा कथितं यत् हिमाचलप्रदेशः चण्डीगढनगरे स्वकीयस्य ७.१९ प्रतिशतं भागं प्राप्तुं निरन्तरं प्रयतते अस्मिन् विषये च सतत सम्भाषणं प्रचलति।

# HPBOSE NEWS- अमेरिकन- हाई- स्कूल- डिप्लोमा इत्यस्मै हिमाचल-शिक्षामण्डलेन १०+२ इति समकक्षत्वेन प्रदत्ता मान्यता

**हिमसंस्कृतवार्ताः- धर्मशाला ।**

हिमाचलप्रदेश-विद्यालयीय-शिक्षा-मण्डलेन एकं महत्त्वपूर्णं निर्णयं स्वीकृत्य, अमेरिकादेशस्य 'नॉर्थवेस्ट एक्रेडिटेशन कमीशन' इत्यनेन मान्यताप्राप्त- विद्यालयैः प्रदीयमानं १२ वर्षीयं अमेरिकन-हाई-स्कूल-डिप्लोमा (ग्रेड-१२) इति मण्डलस्य द्वादशी (१०+२) परीक्षायाः समकक्षत्वेन मान्यता प्रदत्ता। अस्मिन् सन्दर्भे मण्डल-सचिवेन एका अधिसूचना प्रसारिता अस्ति। एषः निर्णयः मानवसंसाधनविकासमन्त्रालयस्य १९९५ तमस्य वर्षस्य अधिसूचनायाः तथा च 'एसोसिएशन ऑफ इंडियन यूनिवर्सिटीज' इत्यस्याः २०१४ तमस्य वर्षस्य पत्रस्य आधारेण गृहीतः। एआईयू इत्यनेन स्पष्टीकृतं यत् एन.डब्ल्यू.ए.सी. अमेरिकायाः मान्यताप्राप्तासु क्षेत्रीय-प्रत्यायन-संस्थासु अन्यतमा अस्ति।



**उच्चशिक्षायां प्रवेशाय मान्यता-**

अस्याः नूतनायाः समकक्षतायाः अनुसारं, एन. डब्ल्यू. ए. सी. मान्यताप्राप्त-विद्यालयानां छात्रैः लब्धं हाई-स्कूल-डिप्लोमा इति उच्चशिक्षायां प्रवेशाय मान्यं परिगणिष्यते। स्कूल- शिक्षा-मण्डलस्य अध्यक्षेण डॉ.राजेशशर्मणा स्पष्टीकृतं यत् इयं समकक्षता केवलम् उच्चशिक्षायां प्रवेशस्य उद्देश्याय एव मान्या भविष्यति।

**प्रामाणिकतायाः सत्यापनम् अनिवार्यम्**

बोर्ड द्वारा एतदपि स्पष्टीकृतं यत् सम्बद्ध- प्रमाणपत्रस्य योग्यतायाः वा प्रामाणिकतायाः वैधतायाश्च सत्यापनं प्रदातृ-संस्थायाः अथवा कस्यापि सक्षमाधिकारिणः पक्षतः कारयितुम् अनिवार्यं भविष्यति। अस्याः अधिसूचनायाः प्रतिकृतयः राज्यसर्वकारस्य शिक्षाविभागाय, उच्चशिक्षाविभागाय अन्येभ्यः सम्बद्धाधिकारिभ्यश्च अपि प्रेषिताः सन्ति। एषः निर्णयः तेषां छात्राणां कृते महती साहाय्यस्य (राहत) वार्ता अस्ति, ये विदेशे प्राप्तायाः स्वशैक्षणिकयोग्यतायाः आधारेण भारते उच्चशिक्षां प्राप्तुम् इच्छन्ति।

# २०-२१ जुलाई दिनाङ्के अत्यधिकवृष्टेः सतर्कता,

## आकस्मिक-जलप्लावस्य भूस्खलनस्य च सचेतना प्रसारिता

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे प्रावृट्कालः एकवारं पुनः सक्रियः जातः, येन प्रदेशस्य अधिकांशभागेषु मन्दतः मध्यमा वृष्टिः सम्भाविता अस्ति। तथापि, भारत-ऋतुविज्ञान-विभाग-शिमला पक्षतः राज्यस्य बहुषु मण्डलेषु प्रचण्डतः अत्यधिक-प्रचण्डवृष्टेः सचेतना कृताः, येन भूस्खलनस्य, आकस्मिक-जलप्लावस्य अन्यासां प्राकृतिक-आपदां च सङ्कटं प्रवृद्धम्।

**आगामि-दिनेषु वृष्टेः पूर्वानुमानम्-**

ऋतुविज्ञानविभागस्य अनुसारं १९ तः २३ जुलाई पर्यन्तं प्रावृट्कालः प्रदेशे सक्रियः स्थास्यति। विशेषरूपेण २० तथा २१ जुलाई दिनाङ्के चम्बा, काङ्गड़ा, कुल्लू, मण्डी, सिरमौर इत्येतेषु मण्डलेषु अतितः अत्यधिक-वृष्टेः सम्भावना प्रकटिता। एतेषु मण्डलेषु भूस्खलनस्य, पङ्कस्खलनस्य आकस्मिक- जलप्लावस्य (फ्लैश फ्लड) च सङ्कटं सर्वतः अधिकं भविष्यति। एतदतिरिच्य, ऊना, हमीरपुरं, बिलासपुरं, शिमला, सोलनम् क्षेत्रेषु अपि बहुषु स्थानेषु अतितः अतिवर्षा भवितुं शक्नोति।

**वर्तमाना ऋतुस्थितिः-**

विगतेषु २४ होरासु प्रदेशस्य बहुषु भागेषु मन्दतः मध्यमा वृष्टिः पञ्जीकृता। वर्तमान- ऋतु-विवरणानाम् अनुसारम्, ऊनाक्षेत्रे सर्वाधिकं अधिकतमं तापमानं ३७.२ डिग्री सेल्सियस अभिलेखितं (रिकॉर्ड), यदा च कुकुमसेरी क्षेत्रे न्यूनतमं तापमानं ११.८ डिग्री सेल्सियस अभवत्। एतद् दर्शयति यत् राज्यस्य विविधेषु भागेषु तापमाने भिन्नता स्थिता अस्ति।

**सम्भाविताः सङ्कटाः प्रभावाश्च-**

अतिवृष्टेः कारणात् संवेदनशीलेषु क्षेत्रेषु भूस्खलनस्य पङ्कस्खलनस्य च आशङ्का वर्तते। नदी-उपनदीनां जलस्तरः वर्धितुं शक्नोति, येन निम्नक्षेत्रेषु जलावरोधस्य समस्या उत्पत्स्यते। मार्गेषु विसर्पणं वर्धितुं सम्भाव्यते,

# बालभारती-लोकविद्यालये, एनटीपीसी-दर्लीपाली-विद्यालये 'बैगलेस-डे' इत्यस्य सफलम् आयोजनम्




दर्लीपाली, १८ जुलाई २०२६। बालभारती-लोकविद्यालये, एनटीपीसी-दर्लीपाली-विद्यालये तृतीयः 'बैगलेस-डे' कार्यक्रमः महानुत्साहेन समायोजितः। अस्य कार्यक्रमस्य प्रमुखोद्देशः विद्यार्थिनां अनुभवानुगत-अधिगमस्य, सृजनशीलतायाः, संप्रेषण-कौशलस्य, जीवन-कौशलस्य तथा नैतिक-मूल्यानां विकासः आसीत्। अयं कार्यक्रमः राष्ट्रीय-शिक्षा-नीति–२०२० तथा संयुक्तराष्ट्रसङ्घस्य सतत-विकास-लक्ष्याणां (SDGs) अनुरूपः सम्पन्नः।कार्यक्रमः त्रिषु चरणेषु विभक्तः आसीत्। प्रथमचरणे "मी एण्ड माई मॉम" इति मातृ-दिवस-प्रतियोगिता आयोजिता, यस्मिन् विद्यार्थिनः स्वमातृभिः सह संयुक्तरूपेण प्रभावपूर्णाः प्रस्तुतयः अकुर्वन्। विविधेषु भूमिका-अभिनयेषु मातृस्नेहः, पारिवारिक-मूल्यानि, साहसम्, त्यागः, सहयोगः च प्रभावशालिरूपेण प्रदर्शिताः।

द्वितीयचरणे बालसभायाः अन्तर्गतं कक्षानुसारं विविधाः प्रतियोगिताः आयोजिताः। लघु-कक्षाणां विद्यार्थिभिः कविता-पाठः, कथा-कथनम्, उच्च-कक्षाणां विद्यार्थिभिः अज्ञात-वीराणां भूमिका-अभिनयः तथा विधि-जागरूकता-अभियानम् उत्साहपूर्वकं प्रस्तुतम्। सर्वेषां विद्यार्थिनां आत्मविश्वासः, वाग्मिता तथा प्रतिभा प्रशंसनीया आसीत्।तृतीयचरणे कौशल-विकास-क्रियाकलापाः सम्पन्नाः। कनिष्ठ-कक्षासु शिष्टाचार-शिक्षणम्, स्वास्थ्यकर-शलाद-निर्माणम्, मध्यम-कक्षासु ओएचपी-पत्रे स्थायीरङ्गोली-निर्माणम्, कठपुतली-निर्माणेन कथा-कथनम्, कैनवा-माध्यमेन पुस्तकावरण-रचना तथा वरिष्ठ-कक्षासु चॉकलेट-निर्माण-प्रशिक्षणम् आयोजितम्। एताभिः क्रियाभिः विद्यार्थिनः व्यावहारिक-कौशलं, सृजनशीलतां तथा उद्यमशीलतां विकसितवन्तः।प्रतियोगितानां निष्पक्ष-मूल्याङ्कनार्थं बाह्यनिर्णायकाः आमन्त्रिताः। निर्णायकैः विद्यार्थिनां प्रतिभायाः प्रशंसा कृता तथा तेषां उत्साहवर्धनम् अपि कृतम्।विद्यालयस्य अध्यक्षा श्रीमती मीनू गोस्वामी, सचिव-प्रबन्धिका श्रीमती नानू रेखी इत्योः मार्गदर्शनेन तथा एनटीपीसी-दर्लीपाली-सहयोगेन सम्पन्नोऽयं कार्यक्रमः विद्यार्थिनां सर्वाङ्गीण-विकासस्य दिशि विद्यालयस्य प्रशंसनीयः प्रयासः अभवत्।अनेन कार्यक्रमेण गुणवत्तापूर्ण-शिक्षा (SDG-4), उत्तम-स्वास्थ्य-कल्याणम् (SDG-3), लैङ्गिक-समानता (SDG-5) तथा शान्ति-न्याय-सशक्त-संस्थानानि (SDG-16) इत्येते सतत-विकास-लक्ष्याः प्रभावकरूपेण प्रोत्साहिताः।कार्यक्रमस्य समापनम् उत्साहेन, हर्षेण नूतनानुभवैश्च सम्पन्नम्। विद्यार्थिनः अस्मात् बैगलेस-डे कार्यक्रमात् शिक्षा, जीवन-कौशलं, सृजनशीलता तथा सामाजिक-मूल्यानां अमूल्यमनुभवं प्राप्तवन्तः।

# डीपीएस-बोकारोमध्ये करियर-मार्गदर्शन-मेलायाः सफलायाः आयोजनम्



**हिमसंस्कृतवार्ता -सौरभः दे बोकारो।**

दिल्ली पब्लिक स्कूल, बोकारो-इस्पात-नगरे स्थिते अश्वघोष-कलाक्षेत्रे वरिष्ठ-माध्यमिक-कक्षाणां छात्राणां कृते करियर-मार्गदर्शन-मेलायाः सफलम् आयोजनम् अभवत्। एषः कार्यक्रमः I Educationalize संस्थया सह संयुक्तरूपेण आयोजितः।अस्मिन् मेलायां बेंगलूरु, चेन्नै, पुणे, रायपुर, हैदराबाद-इत्यादि शिक्षानगरभ्यः आगताः विभिन्न-प्रतिष्ठित-विश्वविद्यालयानां प्रतिनिधयः सहभागिनः अभवन्। तैः कृत्रिम-बुद्धिमत्ता (AI), यन्त्र-अधिगमः (Machine Learning), ग्राफिक-डिजाइनिङ्, मल्टीमीडिया, पत्रकारिता, जनसञ्चारः, विधिः, प्रबन्धनम्, डिजाइनिङ्, सूचना-प्रौद्योगिकी तथा वाणिज्य-क्षेत्रेषु उपलब्धानां करियर-अवसराणां विषये विस्तृतं मार्गदर्शनम् अदीयत। कार्यक्रमे प्रख्याताः करियर-परामर्शदातारः छात्रान् व्यावसायिक-कौशल-विकासस्य, छात्रवृत्तीनां तथा उच्च-शिक्षायाः विविध-विषयेषु जागरूकान् अकुर्वन्। प्राणीशास्त्र-विभागाध्यक्षः डॉ. मनोजसिंहः, बेंगलूरुस्थित-प्रमुख-विश्वविद्यालयस्य क्षेत्रीय-प्रबन्धकः अजयसिंहः तथा हैदराबादस्थितः प्रवेश-विभागाध्यक्षः एवं प्रमाणितः करियर-परामर्शदाता श्री रितेश-जैसवालः स्व-व्याख्यानैः छात्रान् प्रेरितवन्तः।विद्यालयस्य प्राचार्यः डा. ए. एस. गंगवारः अवदत् यत् वर्तमानकाले विद्यार्थिनां पुरतः विविधाः करियर-अवसराः सन्ति। समुचित-समये यथार्थ-मार्गदर्शनस्य उपलब्धिः विद्यार्थिनां भविष्य-निर्माणे अत्यन्तं महत्त्वपूर्णां भूमिकां निर्वहति इति।

# भारतीयरङ्गमञ्च-कला-संस्कृतिसमर्पिताभिः ५५ सजीव-एकलाभिनय-भाण-प्रस्तुतिभिः 'इण्डिया बुक ऑफ रेकॉर्ड्स' इत्यस्य आधिकारिक-अभिलेख-प्रयासे अष्टवर्षीयस्य बालकलाकारस्य मास्टर कर्तव्य वैभवकुमार राणा इत्यस्य ऐतिहासिकी उपलब्धिः







भारतीयरङ्गमञ्चस्य, कलायाः संस्कृतेश्च संरक्षण-संवर्धन-प्रचारप्रसारस्य पवित्रोद्देश्येन केवलम् अष्टवर्षीयः बालकलाकारः मास्टर कर्तव्य वैभवकुमार राणा अत्यल्पे वयसि एकाम् अद्वितीयाम् ऐतिहासिकीं च उपलब्धिम् अर्जितवान् अस्ति। "MISSION 50+" इत्यस्य अन्तर्गतं तेन भगवान् श्रीकृष्णस्य कामदेवस्य च पात्रयोः आधारेण आहत्य ५५ सजीवाः एकलाभिनय-भाण-प्रस्तुतयः दिनाङ्के ०८ जुलाई २०२६ तः १७ जुलाई २०२६ पर्यन्तं, अर्थात् केवलं ९ दिवसेषु, सफलतापूर्वकं सम्पन्नाः। अयं सम्पूर्णः अभियानः India Book of Records इत्यस्य आधिकारिक-अभिलेख-प्रयासस्य "Maximum Live Mono Acting (Bhāṇa) Performances Promoting Indian Theatre, Art & Culture" इति शीर्षकस्य अन्तर्गतं आयोजितः। मास्टर कर्तव्यः केवलं ५ वर्षाणां वयसि रङ्गमञ्चे स्वस्य अभिनयजीवनस्य आरम्भं कृतवान्। विगतेभ्यः ३ वर्षेभ्यः सः निरन्तरं भारतीयरङ्गमञ्चस्य, कलायाः संस्कृतेश्च प्रचारप्रसाराय सक्रियतया कार्यरतः अस्ति। अधुना पर्यन्तं तस्य सजीवप्रस्तुतीनां प्रत्यक्षानन्दम् अनुमानतः ३५,००० तः अधिकाः दर्शकाः प्राप्तवन्तः। गुजरातराज्यस्य खेड़ाजनपदस्य विविधेषु विद्यालयेषु, महाविद्यालयेषु, सामाजिकसंस्थासु, सहकारीसंस्थासु, ग्रामीणक्षेत्रेषु तथा सार्वजनिककार्यक्रमेषु प्रस्तुताः तस्य अभिनयप्रस्तुतयः विद्यार्थिभिः, शिक्षकैः, अभिभावकैः सामान्यजनैश्च अत्यन्तोत्साहपूर्णं प्रतिसादं प्रचुरां प्रशंसां च प्राप्तवत्यः।सम्प्रति मास्टर कर्तव्यः श्री संताराम इंग्लिश मीडियम स्कूल, नडियाद, (खेड़ा जिले, गुजरात राज्य) इत्यत्र कक्षा ३ इत्यस्य विद्यार्थी अस्ति। अभिनयक्षेत्रे उल्लेखनीयाः उपलब्धयः अर्जयन् सः शिक्षाक्षेत्रेऽपि उत्कृष्टं प्रदर्शनं कुर्वन् स्वकक्षायां प्रथमस्थानं प्राप्नोति। शिक्षा-कला-उभयक्षेत्रयोः प्रति तस्य समर्पणभावः अन्येषां बालकानां कृते प्रेरणास्रोतः अस्ति।विगतयोः द्वयोः वर्षयोः सः राज्यसर्वकारेण आयोजितस्य कला महाकुम्भस्य मोनो एक्टिंग प्रतियोगितायां तालुका-जिला-जोन-स्तरेषु विजेता भूत्वा स्वस्य असाधारणप्रतिभायाः परिचयं दत्तवान्। एतदतिरिक्तं सः स्वपित्रा सह अनेकासु नाट्यगतिविधिषु भागं गृहीत्वा बाल्यकालादेव रङ्गमञ्चस्य व्यावहारिकम् अनुभवं प्राप्तवान् अस्ति।मास्टर कर्तव्य वैभवकुमार राणा इत्यस्मै अभिनयस्य प्रेरणा तस्य पिता श्री वैभव जे. राणा इत्यस्मात् प्राप्ता। श्री वैभव जे. राणा सम्प्रति रङ्गमञ्च-विषये (Theatre) पीएच.डी. (Ph.D.) इत्यस्य अध्ययनं कुर्वन् अस्ति। सः अपि अत्यल्पवयसः एव रङ्गमञ्चेन सह सम्बद्धः अस्ति तथा बाल्यकालादेव नाटकेषु, चलचित्रेषु विविधेषु सृजनात्मकमाध्यमेषु च सक्रियतया कार्यं कुर्वन् अस्ति। लेखकः, निर्देशकः, अभिनेता शोधकर्ता च इति रूपेण सः भारतीयरङ्गमञ्चस्य संरक्षणाय संवर्धनाय च निरन्तरं कार्यरतः अस्ति।मास्टर कर्तव्यस्य माता डॉ. हेतल वी. राणा अस्मिन् सम्पूर्णे अभियाने अत्यन्तं महत्त्वपूर्णां भूमिकां निर्वहति। सा एतासां विशेषाणाम् एकलाभिनय-प्रस्तुतीनाम् — संस्कृत-दशरूपकस्य 'भाण' शैलीम् आधारीकृत्य — वेषभूषा-परिकल्पनायां (Costume Design), रूपसज्जायां (Makeup), बालकलाकारस्य कलात्मकसज्जतायां च निरन्तरं योगदानं ददाति।मास्टर कर्तव्यस्य ज्येष्ठपितृव्यः श्री प्रेम राणा रङ्गमञ्चक्षेत्रस्य प्रसिद्धः निर्देशकः, अभिनेता स्वराभिनेता (Voice Actor) च अस्ति। सः रङ्गमञ्चस्य अतिरिक्तं ३० तः अधिकेषु चलचित्रेषु, दूरदर्शन-धारावाहिकेषु तथा वेब-सीरीज़् इत्यादिषु अभिनेता तथा मुख्य-सहायक-निर्देशकः (Chief Assistant Director) इति रूपेण उल्लेखनीयं कार्यं कृतवान् अस्ति। तस्य दीर्घकालीनस्य अनुभवस्य मार्गदर्शनस्य च लाभः मास्टर कर्तव्याय बाल्यकालादेव प्राप्यते।

मास्टर कर्तव्यः तादृशेन कलासमर्पितेन परिवारेण सम्बद्धः अस्ति, यस्मिन् परिवारस्य प्रत्येकः सदस्यः भारतीयरङ्गमञ्चस्य, कलायाः संस्कृतेश्च संरक्षण-संवर्धन-प्रचारप्रसाराय समर्पितभावेन कार्यरतः अस्ति। पिता श्री वैभव जे. राणा, माता डॉ. हेतल वी. राणा, ज्येष्ठपितृव्यः श्री प्रेम राणा च — एतेषां संस्कारैः, मार्गदर्शनेन निरन्तरप्रोत्साहनेन च कर्तव्यः अत्यल्पे वयसि राष्ट्रियस्तरे स्वस्य विशिष्टां परिचितिं स्थापयन् अस्ति।"MISSION 50+" इत्यस्य अन्तर्गतं आयोजितानां सर्वासां प्रस्तुतीनाम् उद्देश्यं केवलम् अभिलेखस्थापनं नास्ति, अपि तु भारतीयरङ्गमञ्चस्य प्राचीनां 'भाण'-परम्परां जीवन्तीं स्थापयितुम्, बालकेषु युवसु च अभिनयस्य प्रति रुचिं विकसितुं तथा भारतीयकलां संस्कृतिं च नूतनपीढीं प्रति सम्प्रेषयितुम् अस्ति।अस्य सम्पूर्णस्य अभियानस्य सम्बन्धिनः सर्वे आवश्यकानि प्रपत्राणि India Book of Records, Guinness World Records, Asia Book of Records, National Book of Records, World Records India तथा International Book of Records इत्येतेषां समक्षम् आधिकारिकमूल्याङ्कनार्थं सज्जीकृताः सन्ति। अस्याः उपलब्धेः सम्बन्धिनः प्रपत्राणि भविष्ये प्रधानमन्त्री राष्ट्रिय बाल पुरस्कारस्य कला एवं संस्कृति (अभिनय) श्रेण्याः कृते आवेदनसमयेऽपि सहायक-उपलब्धिरूपेण प्रस्तुताः भवितुं शक्नुवन्ति।एतासां विशेषाणाम् एकलाभिनय-भाण-प्रस्तुतीनां लेखनं, निर्देशनं सङ्कलनं च श्री वैभव जे. राणा इत्यनेन कृतम् अस्ति। वेषभूषा-परिकल्पनायाः रूपसज्जायाश्च कार्यं डॉ. हेतल वी. राणा इत्यनया कृतम् अस्ति, यदा तु सम्पूर्णस्य अभियानस्य Concept & Project Director इति रूपेण श्री प्रेम राणा मार्गदर्शनं प्रददाति।YASHASVI FOUNDATION द्वारा प्रस्तुतः "MISSION 50+" केवलम् अभिलेख-अभियानं नास्ति, अपि तु भारतीयरङ्गमञ्चस्य, कलायाः संस्कृतेश्च पुनर्जागरणोद्देश्येन सञ्चालितः एकः प्रेरणादायकः सांस्कृतिक-अभियानः अस्ति। अस्य उद्देश्यं देशस्य बालकेषु भारतीयसांस्कृतिकविरासतस्य प्रति गौरवभावनां विकसितुं, बालप्रतिभाभ्यः राष्ट्रिय-अन्ताराष्ट्रियस्तरे परिचितिं प्रदातुं तथा भारतस्य समृद्धां रङ्गमञ्चीयपरम्परां नूतनपीढीं प्रति सम्प्रेषयितुम् अस्ति।केवलम् अष्टवर्षीयवयसि मास्टर कर्तव्य वैभवकुमार राणा स्वप्रतिभया, अनुशासनेन, निरन्तरपरिश्रमेण परिवारस्य मार्गदर्शनेन च एतत् सिद्धं कृतवान् यत् सफलता वयसः परिचायिका न भवति, प्रत्युत समर्पणस्य, संस्कारस्य सततप्रयासस्य च परिचायिका भवति।मास्टर कर्तव्यस्य एषा उपलब्धिः केवलं तस्य वैयक्तिकी सफलता नास्ति, अपि तु गुजरातराज्यस्य सम्पूर्णभारतस्य च रङ्गमञ्चीय-कलात्मक-सांस्कृतिकविरासतायाः गौरवस्य विषयः अस्ति। एतादृशे अत्यल्पे वयसि तेन एतत् सिद्धं कृतं यत् समुचितेन मार्गदर्शनेन, सततपरिश्रमेण भारतीयसंस्कृतेः प्रति समर्पणेन च बालप्रतिभाः अपि राष्ट्रियस्तरे इतिहासं रचयितुं समर्थाः भवन्ति।

"MISSION 50+" इत्यस्य माध्यमेन भारतीयरङ्गमञ्चस्य प्राचीनां 'भाण'-परम्परां जीवन्तीं स्थापयितुम् अयं प्रयासः आगामिनीनां पीढीनां कृते प्रेरणायाः एकः सशक्तः स्रोतः सिद्धः भविष्यति।

# अमरीका-देशेन १८ सहस्र-अनिबन्धित-भारतीयानां निष्कासनस्य महती योजना



अमरीका-देशस्य राष्ट्रपतिः डोनाल्ड ट्रम्पः अनिबन्धित-प्रवासिनां (अनडॉक्यूमेंटेड) निष्कासनस्य (डिपोर्टेशन) महदाभियानं प्रारब्धुं सज्जीभूतः अस्ति। अनेन अमरीका-देशे निवसन्तः अष्टादश-सहस्रम् (18,000) अनिबन्धिताः भारतीय-नागरिकाः लक्ष्यीकृताः सन्ति। अस्मिन् अवसरे ट्रम्प-प्रशासनं तेषां निष्कासनाय सैन्य-विमानानां प्रयोगस्य सिद्धतां कुर्वत् अस्ति, यत् तस्य कठोर-इमिग्रेशन-नीतेः प्रमुखं प्रतीकम् अभवत्। एतेभ्यः अनिबन्धित-भारतीयेभ्यः न तु अभियाचना-कर्तुम्, न तर्कं दातुम्, नापि अभिवक्ता-कर्तुम् अवसरः प्राप्स्यते। ट्रम्प-प्रशासनस्य 'आईसीई' (ICE) इति संस्थायाः दलेन निरन्तरं अन्वेषणं क्रियमाणम् अस्ति।

उल्लेखनीयं यत् 2025 तमे वर्षे अमरीका-देशेन 3,567 भारतीय-नागरिकाः निष्कासिताः आसन्। एषा सूचना भारतस्य विदेश-मन्त्रालयेन 2026 तमस्य वर्षस्य जून-मासे दत्ता आसीत्। मन्त्रालयेन अवोचत् यत् 2026 तमे वर्षे जून-मासं यावत् 1,076 भारतीयाः निर्वासिताः कृताः।2025 तमस्य वर्षस्य फरवरी-मासस्य पञ्चमे दिनाङ्के अमरीका-देशेन प्रथमवारं सैन्य-विमानेन 104 भारतीयाः अमृतसर-नगरे प्रेषिताः आसन्। अस्मिन् अन्तरे बहवः जनाः हस्तशृङ्खलाभिश्च चरणशृङ्खलाभिश्च (हथकड़ी और बेड़ियों से) बद्धाः आसन्। एतेषां चित्राणि प्रकाशम् आगतानि, यैः समग्रे देशे विवादः जातः, संसदि च तीव्रं कोलाहलम् अभवत्। निष्कासनाय द्वौ नूतनौ निरोध-केन्द्रौ (डिटेंशन सेंटर) सज्जीकृतौ ट्रम्प-प्रशासनेन निर्वास्यमानानां प्रवासिनां स्थापनाय एल पासो स्थाने एकः, कैलिफोर्निया राज्ये च द्वौ पण्यागारौ (वेयरहाउस) क्रीतौ। एतेषां कृते प्रायः 16,500 कोटि-रुप्यकाणि व्ययीकृतानि। एतान् निरोध-केन्द्रेषु (डिटेंशन सेंटर) परिवर्तित्य 'आईसीई' (ICE) इति संस्थायै समर्पितम्। अत्र प्रायः द्वादश-सहस्रम् (12,000) प्रवासिनः संस्थाप्यन्ते।

# साहित्यालयस्य मासिकायां रचनागोष्ठ्यां साहित्यकारैः रचनापाठैः समं बद्धम्



## "भारतदेशस्य प्राणः तिरङ्गः..."

बोकारो : प्रसिद्धया साहित्यिकसंस्थया 'साहित्यालयः' शनिवासरे सायंकाले वरिष्ठसाहित्यकारस्य बुद्धिनाथझा-महोदयस्य चीरा-चासस्थिते निवासे मासिकी रचनागोष्ठी समायोजिता। सेल्-संस्थायाः पूर्ववरिष्ठाधिकारी तथा साहित्यालयस्य वरिष्ठसदस्यः हरिमोहनझा-महोदयः अध्यक्षतां वहन्, संयोजकः अमनकुमारझा-महोदयः सञ्चालनं चकार। अस्मिन् कार्यक्रमे साहित्यकारैः भारतीयसंस्कृतिः, परम्परा, मानवीयसंवेदना, देशभक्तिः तथा सामाजिकपृष्ठभूमिः इत्येतेषु विषयेऽu आधारिताः विविधाः रचनाः प्रस्तुताः, येन सर्वे श्रोतारः आनन्दिताः अभवन्। गोष्ठ्याः शुभारम्भः आराध्याझा तथा हिमांशुशेखरझा इत्येताभ्यां प्रस्तुतेन शान्तिपाठेन अभवत्। ततः परं नीलमझा-महोदया हिन्दीभाषायां 'तुम अपनी जैसी बन जाना' इति कवितां तथा मैथिलीभाषायां बारहमासा इति रचनां प्रस्तुतवती। सतीशचन्द्रझा-महोदयः मैथिलीभाषायां 'पाथरक आंखि' इति कथां, शैलजाझा-महोदया 'कलमक विद्रोह' इति मैथिलीकवितां तथा 'शून्य से संभावना' इति हिन्दीकवितां, सुनीलमोहनठाकुर-महोदयः 'भूख' इति मैथिलीकवितां, अमनकुमारझा-महोदयः 'झिंगुरक आंदोलन' इति मैथिलीकवितां तथा 'पाग' इति कथां प्रस्तुतवान्। विजयशङ्करमल्लिकः 'सुधापति' 'झिल्लीक झरुआ', 'आत्मसम्मानीक झुकै ने झंडा' इति मैथिलीकविते तथा 'गाओ स्वदेश जयगाथा' इति हिन्दीकवितां प्रस्तुतवान्। गङ्गेशकुमारपाठकः 'जन्मदिनक शुभकामना', मनोजोपाध्यायः 'सुमन' 'झुग्गी-झोपड़ी समस्या एवं समाधान' इति हिन्दीकवितां प्रस्तुतवान्। अरुणपाठक-महोदयः वरिष्ठसाहित्यकारस्य हितनाथझा-महोदयस्य रचितं, एनसीईआरटी-पाठ्यपुस्तके समाविष्टं मैथिलीदेशभक्तिगीतं 'भारतदेशक प्राण तिरङ्गा' सुमधुरस्वरेण प्रस्तुत्य सर्वान् मन्त्रमुग्धान् अकरोत्। वरिष्ठकविः बुद्धिनाथझा-महोदयः साहित्यालयस्य चतुस्त्रिंशद्वर्षीययात्रां विषयीकृत्य कवितामेकां प्रस्तुतवान्। ततः स्वकीयात् मैथिलीग्रन्थात् 'ॐ महाभारत' इत्यस्मात् श्रीकृष्णस्य शान्तिदूतत्वं तथा युधिष्ठिर-द्रौपदीप्रसङ्गं वर्णयित्वा सर्वेषां प्रशंसां प्राप्तवान्। अध्यक्षीयभाषणे हरिमोहनझा-महोदयः पठितानां रचनानां समीक्षात्मकां टिप्पणीं कृत्वा बोकारोनगरे साहित्यिकगतिविधीनां सजीवपरम्परां धारयितुं साहित्यालयस्य योगदानस्य प्रशंसाम् अकरोत्। सः आशां व्यक्तवान् यत् साहित्यालयः एवमेव निरन्तरं गतिशीलः भूत्वा साहित्यस्य संवर्धने स्वकीयं महत्त्वपूर्णं योगदानं भविष्यत्यपि दास्यति।अन्ते वरिष्ठः अधिवक्ता विश्वनाथझा-महोदयः धन्यवादज्ञापनम् अकरोत्। अस्मिन् अवसरे मिथिला एकेडमी पब्लिक स्कूलस्य अध्यक्षः राजेन्द्रकुमारः, वरिष्ठरङ्गकर्मी शम्भुझा तथा अन्ये बहवः साहित्यप्रेमिणः उपस्थिताः आसन्।

# गुरु-उपदिष्टा

## गुप्तनवराज्याराधना

आषाढमासस्य गुप्तनवरात्रौ विशेषतया दशमहाविद्यानामुपासनाया महत्त्वं तान्त्रिकग्रन्थेषु प्रतिपादितम्। किन्तु सा साधना सामान्यतया गुरोः मार्गदर्शनेनैव कर्तव्या भवति। यदि कश्चन सामान्यो गृहस्थसाधकः गुरोः सकाशादात्म-ज्ञानदीक्षां प्राप्तवान् अस्ति, किन्तु दशमहाविद्यानां पृथक् तान्त्रिकीं दीक्षां न प्राप्तवान्, तर्हि तस्य कृते आदिशक्तेः अथवा स्वेष्टदेव्याः भक्तिरेव युक्ता भवति। सः दुर्गासप्तशती, देवीकवचम्, अर्गलास्तोत्रम्, कीलकस्तोत्रम्, अथवा ललितासहस्रनाम इत्यादीनां पाठं कुर्यात्।दशमहाविद्यानामावाहनं, न्यासः, बीजमन्त्रजपः, तान्त्रिकानुष्ठानानि च समुचितदीक्षां गुरोराज्ञां विना न कर्तव्यानि। यतः एताः साधनाः विशिष्टनियमैः अनुशासनेन च सम्बद्धाः सन्ति।यदि भवतः गुरुणा केवलमात्मज्ञानसाधना अथवा नामजप एवोपदिष्टः, तर्हि गुप्तनवरात्रौ गुरुणा प्रदत्तस्य मन्त्रस्य जपः, तेन निर्दिष्टायाः साधनायाश्च श्रद्धया पालनमेव सर्वश्रेष्ठं मन्यते। गुरुवचनपालनं कस्यापि विशेषानुष्ठानात् अधिकफलप्रदमिति परम्परया स्वीकृतम्। यदि गुरुणा दशमहाविद्यादीक्षा विशेषरूपेण न प्रदत्ता, तर्हि गुप्तनवरात्रौ नवदुर्गायाः अथवा आदिशक्तेः सरलोपासना तथा गुरुमन्त्रस्य जप एव भवतः कृते सर्वाधिकः हितकरः, सुरक्षितश्च साधनामार्गः। गुरोर्निर्देश एव सर्वथा परमप्राथमिकतया ग्राह्यः।

आषाढगुप्तनवरात्रिः सनातनधर्मे आध्यात्मिक- साधनायाः अत्यन्तं गोपनीयः पवित्रश्च कालः मन्यते। अस्य पावनकालस्य आध्यात्मिकमहत्त्वं संक्षेपेण एवं ज्ञायते-

अन्तःशुद्धिः- एते नवदिनाः बाह्याडम्बरान् परित्यज्य मौनसाधनया आत्मनः शुद्ध्ये श्रेष्ठमवसरं प्रयच्छन्ति।

गुप्तशक्तिप्राप्तिः- अस्मिन् काले दशमहाविद्यानां गूढोपासनया साधकः मानसिकाम् आध्यात्मिकीं च शक्तिं प्राप्नोति।

इच्छाशक्तेर्जागरणम्- गुप्तनवरात्रौ कृतः श्रद्धापूर्वको जपः अन्तर्निहितां कुण्डलिनीशक्तिं दृढामिच्छाशक्तिं च जागरयति।

विघ्नविनाशः- एषा साधना सांसारिकमोहं नकारात्मकप्रवृत्तीश्च नाशयित्वा मोक्षमार्गं प्रशस्तं करोति।

**श्लोकः-**

काली तारा तथा षोडशी भुवनेश्वरी तथा।
भैरवी छिन्नमस्ता च धूमावत्यथ बगलामुखी॥
मातङ्गी कमलात्मा च दशैताः महाविद्यकाः।
सर्वसिद्धिप्रदाः प्रोक्ताः साधकानां हिताय वै॥
(तोडलतन्त्रम्, चामुण्डातन्त्रम्, प्रथमः पटलः, श्लोकौ ५-६)

आषाढशुक्लप्रतिपदातः गुप्तनवरात्रेः आरम्भः भवति। अस्मिन् पवित्रकाले तन्त्रमार्गानुसारिणः साधकाः देवीसत्याः दशमहाविद्यानां कृपाप्राप्त्यर्थं विशेषसाधनां कुर्वन्ति।

हिन्दूपञ्चाङ्गानुसारं वर्षे चतस्रः नवरात्रयः भवन्ति- चैत्रे, आषाढे, आश्विने, माघे च। चैत्राश्विनमासयोः प्रकटनवरात्रे भवतः, आषाढमाघमासयोः तु गुप्तनवरात्रे इति प्रसिद्धे। गुप्तनवरात्रौ देवीसत्याः दशमहाविद्यानां कृपाप्राप्त्यर्थं गूढसाधनाः क्रियन्ते। तासु महाविद्यासु काली, तारा, षोडशी, भुवनेश्वरी, भैरवी, छिन्नमस्ता, धूमावती, बगलामुखी, मातङ्गी, कमला च समाविष्टाः। एताः साधनाः तन्त्रमार्गे दीक्षितैरेव साधकैः विधिपूर्वकं कर्तव्याः। सामान्यभक्तैः तु एतेषु दिनेषु नवदुर्गाणामेव भक्त्या पूजनं करणीयम्। गुप्तनवरात्रौ उभयविधोपासनायाः विधानं शास्त्रेषु दृश्यते; तथापि साधकस्य अधिकारः, दीक्षा, गुरोर्निर्देशश्च एव साधनामार्गस्य निर्णायकाः भवन्ति।



**लेखिका- आचार्या रमनदीपकौरः**
**संस्कृतविदुषी, हिन्दुस्तानी- शास्त्रीय- सङ्गीतगायिका च।**

# सोनम वांगचुक महोदयस्य चिकित्साकार्ये हस्तक्षेपं कर्तुं दिल्ली-उच्चन्यायालयस्य अस्वीकारः



दिल्ली-उच्चन्यायालयः सामाजिककार्यकर्तुः सोनम वांगचुक महोदयस्य सफदरजंग-चिकित्सालये (अस्पताल) प्रचलन्त्यां चिकित्सायां हस्तक्षेपं कर्तुं निराकृतवान्। न्यायेन उक्तं यत् वांगचुक महोदयं जन्तर-मन्तर स्थानात् चिकित्सालये प्रवेशयितुं सर्वकारस्य निर्णयः स्वेच्छाचारी इति वक्तुं न शक्यते।न्यायमूर्तिः मिनी पुष्करणा अवदत् यत् वांगचुक महोदयं कस्मिंश्चित् निजी-चिकित्सालये प्रेषयितुं सद्यः आदेशस्य आवश्यकता नास्ति। चिकित्सकाः तस्य स्वास्थ्यस्थितेः निरीक्षणं कुर्वन्ति, तस्य सम्मत्या एव च चिकित्सा क्रियमाणा अस्ति। न्यायालयः वांगचुक महोदयस्य पत्न्याः गीतांजलि आंगमो वर्यायाः तस्यां याचिकायां सुनवायीं करोति स्म, यस्यां वांगचुक महोदयं निजी-चिकित्सालये प्रेषयितुं याचना कृता आसीत्। न्यायालयेन अस्मिन् विषये केन्द्रसर्वकाराय, सफदरजंग-चिकित्सालयाय, दिल्ली-आरक्षकदलाय च दिनत्रयस्य अन्तरे उत्तरं दातुं सूचनापत्रं प्रेषितम्।उल्लेखनीयं यत् वांगचुक महोदयस्य अनशनस्यएकविंशतितमे दिने ह्यः आरक्षकदलेन सः सफदरजंग-चिकित्सालये भर्तीकृतः आसीत्।

# हास परिहासम्

पत्नी – कम्बलं सुव्यवस्थितं करोतु कृपया।
पतिः – रात्रौ पुनरपि आवरणार्थम् उपयोक्तव्यं भविष्यति, तर्हि तत् सुव्यवस्थितं किमर्थं?
पत्नी - 😳 🤔 😈
पतिः – दूरभाषयन्त्रं विद्युत्सञ्चयेन पूरय।
पत्नी – यदा पुनः निर्विद्युत भविष्यति, तर्हि किमर्थं पूरयामि?
पतिः – 🙄
पतिः – मम शाटिकां सम्यक् इस्त्री कुरु। **पत्नी** – यदा सा पुनः कुचेलिका भविष्यति, तर्हि इ[illegible]?
पतिः 🙄

**डॉ.विदुषी अग्रवालः**

# विनोदकणिका

गतदिने प्रातःकाले अहं किञ्चित् अध्यात्मिकं भूत्वा नेत्रे निमील्य चिन्तनम् आरब्धम्। कः अहं? कुतः आगतवान्? अस्मिन् जगति मम किं कार्यम्? जीवनस्य ध्येय किम्?
तस्मिन् क्षणे पाकगृहतः आगतः ध्वनिः- त्वं बहु आलसी असि। न जानामि कस्मिन् विश्वात् आगतवान्- मम आयुष्यं नष्टं कर्तुम्-
शीघ्रम् उत्तिष्ठ, स्नानाय गच्छ, तदनन्तरं कार्यालयं गच्छ- मम चतुर्णाम् प्रश्नानाम् उत्तराणि मया प्राप्तानि। 😎🤣🤷

**डा वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**




**नन्दिनी-** नमो वः। गतदिनेतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अतीव विचित्राः वार्ताः मया सङ्गृहीताः सन्ति।
फ्लोरिडा-प्रदेशे एकस्मिन् भोजनालये अजगर- विनिमयेन वृत्तापूपः क्रीतः।
भोजनालयस्य स्वामिना उक्तम् यत् अजगरस्य मांसम् अपि वृत्तापूपस्य उपरि स्थापितम् अस्ति।
**नन्दिनी-** अहो! अजगर-मांसस्य भक्षणम्? एतत् तु अतीव जुगुप्सितम् अस्ति।
अन्या वार्ता श्रूयताम्। द्विचक्रिकायै एका नूतना पादघट्टनी निर्मिता अस्ति।
सा अनावृत-पादाभ्यां चालनाय कल्पिता अस्ति, अस्याः मूल्यं त्रिशताधिक-डालर-मुद्रा-परिमितम् अस्ति। (Fix 1)
अस्याः मध्ये एकः कीलकः स्थापितः अस्ति यः पादाङ्गुष्ठस्य समीपे तिष्ठति।
**काव्या-** पादत्राणं विना द्विचक्रिका-चालनं कष्टावहम् एव!
परन्तु धनरक्षणार्थम् एकस्य सङ्गणक-तन्त्रज्ञस्य उपायः भवत्या श्रुतः वा?
बेङ्गलूरु-नगरे एकेन तन्त्रज्ञेन स्वस्य बहुमूल्य- दूरभाषयन्त्रं विक्रीतम् अस्ति।
आपणिकैः सह मूल्य-विषये विवादं कर्तुम् सः दरिद्र-वेषं कृतवान् अस्ति। (Fix 2)
तेन चिन्तितम् यत् धनिकः इति ज्ञात्वा आपणिकैः अधिकं मूल्यं पृच्छयते।
**नन्दिनी-** हा हा! धनम् अस्ति चेदपि दरिद्र-वेषः धृतः!
अस्माकं भोपालनगरे जनानां विश्वासः अपि तादृशः एव विचित्रः अस्ति।
वृष्टि-अभावात्, तत्रत्यैः जनैः गर्दभेभ्यः मधुरगोलकानि दत्तानि सन्ति!
तैः उक्तम् यत् मिष्टान्न-भक्षणेन गर्दभाः तुष्टाः भवन्ति, तेन च पर्जन्य-देवः प्रसन्नः भवति।
**काव्या-** सत्यम्, गर्दभाः मिष्टान्नं खादितवन्तः सन्ति, परन्तु पर्जन्य-देवः गतदिनेपि न आगतः।
सर्वाः गतदिनेतनाः वार्ताः अतीव विस्मयकारिकाः। धन्यवादः।

# संस्कृतं मधुरं सदा- ५९



पुराकाले भगवता श्रीकृष्णेन अर्जुनाय परमं तत्त्वज्ञानं प्रदत्तम् आसीत्, अनेन सः कृतकृत्यः जातः, भगवत्कृपया तत्परमज्ञानञ्च लब्धवान्। यज्ज्ञानं श्रीभगवता जनकल्याणाय प्रदत्तमासीत्, अर्जुनमाध्यमेन। जीवने सम्भाव्यपूर्णाः सर्वेऽपि प्रश्नाः अर्जुनेन पृष्टाः, भगवता अपि एकैकशः तेषां प्रश्नानाम् समुचितम् उत्तरं प्रदत्तमासीत्। एतासु जिज्ञासासु काचित् जिज्ञासा अर्जुनेन भगवत्पुरतः उपस्थापितासीत्, तद्विषये अत्र किञ्चित् चर्चा विधीयते।
अर्जुनः- भगवन्! तव मुखारविन्दतः मया अत्यन्तं सुष्ठु एवं ज्ञानपूर्णानि वचनानि श्रुतानि, यैः अमृतवचनैः अहं कृतकृत्योऽस्मि, धन्यतां गतोऽस्मि। प्रभो! वचनानि इमानि अन्येष्वपि श्रावयितुं शक्नुयां वा?
**श्रीकृष्णः-** नहि अर्जुन। तव पुरतः मया कथितम् अत्यन्तं गुह्यतममिदं वचनम् असहिष्णुजनानां पुरतः कथयितुम् अशक्यमेव कदाचिदपि । ये मम भक्ताः न स्युः, ते एतादृशस्य वचनस्य अधिकारिणः भवितुमपि नार्हेयुः। अन्यच्च, श्रवणरुचिरहितानां, दोषदृष्टिपरायणानां च पुरतः तदुच्यते चेदपि न कोऽपि लाभः, अपि तु कथयितारं दोषः हि बाधते। अतः एतादृशेषु वचनमिदं न श्रावणीयम्।
**अर्जुनः-** तर्हि एतादृशस्य उत्तमज्ञानस्य अधिकारिणः के लोके?
**श्रीकृष्णः-** केवलं मद्भक्तेषु कथय, दुष्टमतिषु न। यः मनुष्यः मामकीनां परां भक्तिमुद्दिश्य कथितम् इमं गोपनीयं गीतावचनं मद्भक्तेषु कथयिष्यति, सः निःसन्देहं मामेव प्राप्स्यसि। न तावन्मात्रमेव, तेन सदृशो मे प्रियः, प्रियकार्यकारी च न कोऽपि भविष्यति अस्मिन् जगति। तादृशेन हि मनुष्येणाहं सदा ज्ञानयज्ञेन पूजितो भवामि, नात्र सन्देहः इति, शुभम्।



# काक-विडाल्योः कथा

ग्रामस्य विथिकाषु एका विडाली भ्रमति स्म। मुण्डेरे रोटिकां खादन् एकेन काकेन सा अवलोकिता। रोटिकां त्यक्तवा काकः विडाली समीपं गत्वा उच्चैः ' कांव -कांव ' इत्यारभत्। तस्य श्रुत्वा अन्य : पञ्चषाः वायसाः अपि तत्र प्राप्नुवन्तः। बालाःऔत्सुक्येन गृहाद् बहिः आगतवन्तः। मंदं -मंदं गच्छन्ती विडाली सहसा तीव्रगत्या पलायिता।
गच्छन्न कश्चन वयोवृद्धः बालकान् सम्बोधितवान्। पूर्वजन्मे विडाली नवविवाहिता आसीत्।वायसाः तस्याः शिविका-वाहकाः आसन्।सा विवाहिता तदानीं तेषां पारिश्रमिकं न दत्तवती। समयं प्राप्त्वा सा विवाहिता विडाली वाहकाः च वायसाः अभूवन्। तस्मात् अद्यैव वायसाः विडालीं दृष्ट्वा तद् पारिश्रमिकं याचन्ते विडाल्यः त्रपन्ते च।
घोषणा -प्रचलिता दंतकथा मया संस्कृते निरुपिता अस्ति। रचना स्वरचिता अस्ति।

**(मोती प्रसाद साहू)**
संस्कृत -अध्यापकः
अटल -आवासीय-विद्यालय-गुरमुरा सोनभद्रः



# अथ विवाहपात्रतापरीक्षा 02

## (Marriage Eligibility Test)

कन्यार्थी दुहितुः पिता विनयवान् सम्प्राप्य तद्वेश्म तत्
योग्यं शिक्षितमेव पुत्रमपरं द्रष्टुं समुत्साहितः।
स्वागत्या विनयेन तेन जनकेनासौ समभ्यर्चितः
प्रारब्धा तत एव मङ्गलमयी वैवाहिकी मन्त्रणा॥१॥

पुत्रोऽयं बहुशास्त्रपारग इति प्रीत्या पिता वर्णयन्
विद्याभिर्बहुभिः समर्चिततनुर्विख्यातकीर्तिर्भृशम्।
राज्ञः सेवक एव सम्प्रति सुतो निश्चित्य वृत्तिं शुभां
भावी जीवनवैभवं समुदितं सस्नेहमाख्यादसौ॥२॥

श्रुत्वैतद्वचनं पुनः पुनरयं कन्यापिता सस्मितः
पृष्ट्वैकं विनयेन केवलमिदं क्षेत्रं कियद्विद्यते।
नो विद्या नहि सेविका न च गुणा चर्चा न कस्याभवन्
भूमिमेव पुनःपुनः कथितवान् प्रश्नं न भिन्नं कृतम्॥३॥

आश्चर्येण ततोऽब्रवीत् स जनको युक्तं न मे लक्ष्यते
विद्वान्नुच्चपदे नियुक्ततनयस्सर्वेऽभिनन्दन्ति तम्।
सर्वैः पूज्यतमो गुणैरुपचितः किं क्षेत्रचिन्ताऽधुना
कस्मादेव मुहुर्मुहुर्हि भवता भूमेः प्रसङ्गः कृतः॥४॥

सप्रेमेदमवेत्य वाक्यमनघं निश्चित्य चित्ते दृढं
विद्यासेवनमस्तु शोभनतमं मान्यं हि लोके सदा।
दैवं चेन्न विपर्ययं वितनुते को वेद भावीगतिं,
क्षेत्रं तिष्ठति जीविकैकशरणं काले विपत्तेरपि॥५॥

विद्या राजनियुक्तिरेव सुतरां स्तुत्या धनं च स्थिरं
क्षेत्रं च स्थिरमाश्रयः कुलहिते दुःखेषु संजीवनम्।
एतत्त्रितयसंयुतं यदि भवेद्दाम्पत्यजीवन्महो
तस्मादेतदवेक्ष्य निर्णयविधिः कार्यो बुधैः सर्वदा॥६॥

निन्दा नैव कृताऽत्र सेवकपदे नो विद्यया गर्हिता
नो वा भूमिधनस्य केवलमिह स्तुत्यैव संकीर्तिता।
युक्त्या यः परिपश्यति स्वविषयं सोऽर्थं समासादयेत्
सर्वेषां गुणदोषविच्युतधिया कार्यो विवाहः सुधीः॥७॥

# आङ्ग्लदेशेन भारतं २७ धावनाङ्कैः पराजित्य श्रृङ्खला २-१ इति अन्तरालेन स्वनाम्नि कृता



भारत-आङ्ग्लदेशयोः मध्ये त्रि-स्पर्धानां एकदिवसीय-श्रृङ्खलायाः रोमाञ्चकः अन्तः आयोजक-दलस्य पक्षे अभवत्। 'लॉर्ड्स' क्रीडाङ्गणे क्रीडिते अन्तिमे क्रीडने आङ्ग्लदेशेन भारतं २७ धावनाङ्कैः पराजित्य श्रृङ्खला २-१ इति अन्तरालेन स्वनाम्नि कृता।
भारताय ३८८ धावनाङ्कानां बृहत् लक्ष्यं प्राप्तमासीत्, दलेन च उत्तमा आरम्भः कृता, किन्तु अन्तिम-ओवरेषु निरन्तरं स्तोभानां पतनेन विजयः हस्तच्युतः अभवत्। रोहित शर्मा वर्यस्य शतकीय-पारी विराट कोहली वर्यस्य च अर्धशतकीयस्पर्धा अपि दलं विजयं नेतुं असफले अभवताम्।